ઓં સત્ગુરુભ્યો નમઃ

## <u>બૃહસ્પતિ (વ્યાળ) સ્તોત્રં</u>

બૃહસ્પતિઃ સુરાચાર્યો દયાવાન્ શુભલક્ષણઃ
લોકત્રયગુરુઃ શ્રીમાન્ સર્વ્વજ્ઞ સર્વ્વકોવિદઃ (1)

સર્વ્વેશઃ સર્વ્વદાભીષ્ટઃ સર્વ્વજિત્ સર્વ્વપૂજિતઃ
અક્રોધનો મુનિશ્રેષ્ઠો નીતિકર્ત્તા ગુરુઃ પિતા (2)

વિશ્વાત્મા વિશ્વકર્ત્તા ચ વિશ્વયોનિરયોનિજઃ
ભૂર્ભુવ સુવરોં ચૈવ ભર્ત્તા ચૈવ મહાબલઃ (3)

પઞ્ચવિંશતિ નામાનિ પુણ્યાનિ નિયતાત્મના
વસતા નન્દભવને વિષ્ણુના કીર્ત્તિતાનિ વૈ (4)

યઃ પઠેત્ પ્રાતરુત્થાય પ્રયતઃ સુસમાહિતઃ
વિપરીતો ટ પિ ભગવાન્ પ્રીતો ભવતિ વૈ ગુરુઃ (5)

યઃ શ્રુણોતિ ગુરુસ્તોત્રં ચિરઞ્જીવેન્ ન સંશયઃ
બૃહસ્પતિ કૃતાપીડા ન કદાચિત્ ભવિષ્યતિ

***બૃહસ્પતિસ્તોત્રં સન્પૂર્ણં.***